National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(58): 285-288
© 2025 NJHSR
www.sanskritarticle.com

नरसिंहगणेशभट्टः
शोधच्छात्रः, व्याकरणविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीराजीवगान्धीपरिसरः,
शृङ्गेरी

Correspondence:
नरसिंहगणेशभट्टः
शोधच्छात्रः, व्याकरणविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीराजीवगान्धीपरिसरः,
शृङ्गेरी

"इदुदुपधस्य चाप्रत्ययस्य" इति सूत्रविमर्शः

नरसिंहगणेशभट्टः

शोधसारः – संस्कृतवाङ्मयजगति ऐन्द्रचान्द्रकाशकृत्स्नादिव्याकरणेषु विद्यमानेषु सत्सु रत्नस्वरूपेण शोशुभ्यते पाणिनीयम्। लौकिकवैदिकशब्दव्युत्पत्तिप्रतिपादनाच्च जगतीतले विशिष्टं स्थानं भजते। तपस्सन्तुष्टमहेश्वरप्रसादप्राप्ताक्षरसमाम्नयमाश्रित्यप्रणीताष्टाध्याय्यी अष्टसु अध्यायेषु विभक्ता सती संज्ञा, परिभाषादिभेदेन षोढा विभज्यते। उपचतुसहस्रं सूत्राण्यपि एतेषु षट्स्वेवान्तर्भवन्ति। उपचतुसहस्र-सूत्रेष्वन्यतमं सूत्रं वरीवर्ति **"इदुदुपधस्य चाप्रत्ययस्य"**। अष्टमाध्यायस्य तृतीयपादे विद्यमानस्य सूत्रस्यास्य दलानां पाणीनीयव्याकरणस्य प्रक्रियाज्ञानस्य आधारस्तम्भभूतवैयाकरण-सिद्धान्तकौमुद्याः व्याख्यानैः सह विमर्शनं नितान्तमौचित्याय कल्पत इति हेतोः प्रत्येकं दलस्य विवेचनपूर्वकं प्रयोजनोपन्यासः प्रकृतलेखे उपलक्ष्यते। विशिष्य प्रढमनोरमा-शब्दरत्नयोः मतभेदः कोटिक्रमेणोपन्यस्तो विद्यते। पूर्वपक्षसिद्धान्तरूपेण विषयोऽत्र निगदितः।

उपोद्घातः - धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु मोक्षाख्यः पुरुषार्थ एव सर्वेषां प्राणिनां परमप्रयोजनं भवति, तत्प्राप्तये च वेद एव मुख्यतमं स्थानं भजते। तदुक्तञ्च

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक्।।[1]

अधिगमाय च तादृशस्य वेदस्य षडङ्गानि भवन्ति ।

शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।

षट्स्वङ्गेषु मुखमिव मुख्यस्थानत्वात् मुमुक्षार्थिभिः सर्वैः नूनमध्येयमेव। तदुक्तं पाणिनीयशिक्षायां **"तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते"** । वाक्यपदीयेऽपि

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।[2] इति

भाष्यकारोप्याह – **"प्रधाने च कृतो यत्नः फलवान् भवति"**[3] । इदं च व्याकरणं न केवलं मोक्षसाधनमपि तु अन्येषां वेदाङ्गानामप्युपजीव्यं भवति। ऐन्द्रं-काशकृत्स्नं-चान्द्रमित्यादीनि बहूनि व्याकरणानि विश्वस्मिन् विश्वे समुपलभ्यन्ते तथापि तपस्सन्तुष्टमहेश्वरप्रसादप्राप्तत्त्वात् वैदिकलौकिकशब्दान्वाख्यानत्वाच्च पाणिनीयव्याकरणमेव वेदाङ्गत्त्वेन परिगण्यते। पाणिनि-कात्यायन-पतञ्जल्याख्यातैः त्रिभिर्मुनिभिः प्रणीतत्त्वात् त्रिमुनिव्याकरणमित्यपि कथ्यते।

तदेतस्मिन् पाणिनीये व्याकरणे उपचतुस्सहस्रसूत्राणि सन्ति । तानि सूत्राणि षोढा विभक्तुं शक्यानि

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।। इति।

भगवान् पाणिनिः लाघवेन शास्त्रप्रक्रियानिर्वाहाय कार्यार्थञ्च संज्ञादीनि सूत्राणि रचयामस। तादृशसंज्ञासूत्रेष्वन्यतमं भवति प्रकृतसूत्रम्। तदेतत्सूत्रस्थदलानां विमर्शनं प्रकृतेऽस्मिन् लेखे विधास्यते।

कुञ्चिकापदानि – इदुदुपधस्य, अप्रत्ययस्य, सामानाधिकरण्यम्, वैयधिकरण्यम्।

तथ्यसङ्कलनम् –

इदुदुपधस्य चाप्रत्ययस्य सूत्रार्थः

"इदुदुपधस्य चाप्रत्ययस्य" इति हि सूत्रम्। इदुदुपधस्य च अप्रत्ययस्य इति पदविभागः अत्र बोध्यः। "इणः षः"[4] इत्यस्मात् सूत्रात् षः इति पदं, "कुप्वोः ≍क≍पौ च"[5] इति सूत्रात् कुप्वोः इति पदञ्चानुवर्तते। "विसर्जनीयस्य सः"[6] इत्यस्मात् सूत्रात् विसर्जनीयस्य इति पदञ्चानुवर्तते। इत् च उत् च इदुतौ, इदुतौ उपधे यस्य सः समुदायः इदुदुपधः समुदायः। इदुदुपधसमुदायस्य अवयवः यः विसर्गः तस्य विसर्गस्य। "इदुदुपधस्य" इत्यस्य वैयधिकरण्येन विसर्जनीयस्य इत्यत्रान्वयः। अप्रत्ययस्य इत्येतत् विसर्जनीयस्य इत्यत्र सामानाधिकरण्येनान्वेति, अप्रत्ययः यः विसर्गः अर्थात् प्रत्ययभिन्नः यः विसर्गः तस्य विसर्गस्य इति दीक्षितः अभिप्रैति। शब्दरत्नकृत् तु अप्रत्ययस्य इत्येतत् विसर्गस्य इत्यत्र वैयधिकरण्येनान्वेति इति अभिप्रैति। दीक्षितमते अप्रत्ययस्य विसर्गस्य इत्यनयोः सामानाधिकरण्येनान्वये सूत्रार्थः कः स्यात् इति चेत् - इदुदुपधशब्दावयवः यः प्रत्ययभिन्नः विसर्गः तस्य विसर्गस्य षकारः स्यात् कुप्वोः परयोः इत्यर्थः सिद्ध्यति। आदौ दीक्षितमतं निरूप्य अनन्तरं शब्दरत्नकृदाशयः प्रतिपाद्यते अत्र। इदुतौ उपधे यस्य इदुदुपधः समुदायः इति कश्चन समुदायः अत्र आक्षेपात् लभ्यते। "अलोऽन्त्यात् पूर्व उपधा" इति सूत्रेण अन्त्यात् पूर्ववर्णस्य उपधासंज्ञाविधानात्, अन्त्यशब्देन अवयववाचकेन समुदायः आक्षिप्यते। उपधात्वस्य समुदायनिरूपितावयवत्वात्। तथा च दीक्षितमते इदुदुपधशब्दावयवः यः प्रत्ययभिन्नः विसर्गः, तस्य विसर्गस्य षकारः स्यात् कुप्वोः परयोः इत्यर्थः लभ्यते।

उदाहरणम्

निः प्रत्यूहम् इत्यत्र इदुपधः शब्दः निः। तदवयवः विसर्गः प्रत्ययभिन्नः, अतः तस्य विसर्गस्य पकारे परे षत्वे निष्प्रत्यूहम् इति रूपं सम्पद्यते। एवमेव दुष्कृतम् इति रूपं च सिद्ध्यति इति बोध्यम्।

अप्रत्ययस्य विसर्जनीयस्य इत्यनयोः सामानाधिकरण्येनान्वयः इति दीक्षितमतम्

अप्रत्ययस्य इति शब्दस्य विसर्जनीयस्य इत्यत्र सामानाधिकरण्येनान्वेति इति दीक्षितः। तेन प्रत्ययभिन्नो यो विसर्गः तस्य इत्यर्थः लब्धः। तेन प्रत्ययभूतस्य विसर्गस्य षत्वं नास्ति इत्यर्थः च फलितः।

प्रत्ययरूपविसर्गस्य प्रसिद्धता

एवं सति अत्र आशङ्का उदेति - प्रत्ययरूपः विसर्गस्तु अप्रसिद्धः। एवं सति प्रत्ययभूतस्य विसर्गस्य षत्ववारणं च अनावश्यकम् इति। तस्य समाधानमुच्यते - "अग्निः करोति" इत्यत्र विसर्गस्य प्रत्ययत्वं प्रसिद्धम्। तत्र सुप्रत्ययस्य यः सकारः स एव विसर्गाकारेण परिणतः। अतः अत्र प्रत्ययरूपः विसर्गः अस्ति। तस्य षत्ववारणाय "अप्रत्ययस्य" इति पर्युदासः सार्थकः इति। तस्मिन् विसर्गे "स्थानिवदादेशोऽनल्विधौ"[7] इति सूत्रेण स्थानिवद्भावेन प्रत्ययत्वं सम्पाद्यते इति।

स्थानिवद्भावेन प्रत्ययरूपविसर्गस्य प्रसिद्धता

पुनरत्र उदेति - "अग्निः" इत्यत्र विसर्गे स्थानिवद्भावेन प्रत्ययत्वमतिदेष्टुं न शक्यते। यतः अतिदेशं प्रति त्रिपादी असिद्धा। स्थानिवत्सूत्रदृष्ट्या अत्र विसर्गस्य आदेशस्य अदर्शनात्, अतिदेशस्य प्रसक्तिरेव न। अतः विसर्गे स्थानिवद्भावेन प्रत्ययत्वं दुर्लभम् इति। तस्य समाधानं तु - "अप्रत्ययस्य" इति निषेधः एव व्यर्थः स्यात् एवं सति। अतः अप्रत्ययस्य इति निषेधेनैव अतिदेशदृष्ट्या त्रिपाद्याः सिद्धत्वं ज्ञाप्यते। अत एव "अग्निः" इत्यादौ रोः विसर्गश्च सिद्ध्यति। रुत्वविधायकशास्त्रस्यापि त्रैपादिकत्वेन, तस्यापि अतिदेशदृष्ट्या असिद्धत्वे "अग्निर्" इत्यत्र रेफे प्रत्ययत्वातिदेशाभावे, तस्य सुबन्तत्वाभावात्, पदत्वाभावात्, "खरि अवसाने च परे रेफस्य विसर्गः स्यात् पदान्ते" इत्यर्थकेन "खरवसानयोर्विसर्जनीयः"[8] इति सूत्रेण पदान्तरेफस्य विधीयमानः विसर्गः "अग्निर्" इत्यत्र न स्यात्। रेफस्य प्रत्ययत्वातिदेशं विना पदान्तत्वदुर्लभात्। एवं सति प्रत्ययत्वं विसर्गे स्थानिवद्भावेन सुगममेव। पदान्तरेफस्य विसर्गविधानमेव अतिदेशं प्रति त्रिपाद्याः सिद्धत्वं ज्ञापयति इत्युच्यताम्। यतः अतिदेशं विना रेफान्तस्य पदस्य रेफस्य विसर्गः एव न स्यात्। अतः "अप्रत्ययस्य" इति निषेधः व्यर्थः सन् अतिदेशशास्त्रदृष्ट्या त्रिपाद्याः सिद्धत्वकल्पनं मास्तु इति चेन्न, "पुनः" इत्यादौ विसर्गविधानस्य अतिदेशं विना एव चारितार्थ्यात्। तत्र च "पुनर् सु" इत्यत्र सुलोपोत्तरम् "अव्ययादाप्सुपः"[9] इति सूत्रेण, तत्र "पुनर्" इत्यस्य प्रत्ययलक्षणेन पदत्वात्, रेफस्य पदान्तवृत्तित्वात्, रेफस्य विसर्गसिद्ध्या विसर्गविधानस्य अतिदेशं प्रति त्रिपाद्याः सिद्धत्वे ज्ञापकत्वकल्पनं न युक्तम्। अतः एतत्सूत्रस्थम् "अप्रत्ययस्य" इति ग्रहणमेव तज्ज्ञापकम् इति वक्तव्यम्। "पुनर् स्" इत्यत्र जातपदसंज्ञायाः एव सुलोपोत्तरं केवले रेफान्ते अतिदेशात्, रेफस्य पदान्तवृत्तित्वात्, अत्रापि अतिदेशस्य सत्त्वात्, विसर्गविधानमेव अतिदेशं प्रति त्रिपाद्याः सिद्धत्वे ज्ञापकं भवतु इत्याक्षेपे, अत्र रेफे प्रत्ययत्वस्य अतिदेशो न। "अग्निर्" इत्यादौ तु रेफे सुप्रत्ययत्वस्य अतिदेशाभावे, तस्य पदत्वाभावात्, रेफस्य विसर्गो न स्यात्। पुनर् इत्यत्र तु पदत्वस्य अतिदेशो भवति इति वैलक्षण्यम्। अतः "अप्रत्ययस्य" इत्ययमंशः एव अतिदेशं प्रति त्रिपाद्याः सिद्धत्वे ज्ञापकम् इति वक्तव्यम्। एवञ्च अप्रत्ययस्य इत्यनेन त्रिपाद्याः अतिदेशं प्रति सिद्धत्वज्ञापनेन अग्निः इत्यादौ विसर्गे प्रत्ययत्वस्य अतिदेशः भवत्येव। तेन प्रत्ययरूपः विसर्गः प्रसिद्ध्यति। तद्वारणाय "अप्रत्ययस्य" इति पर्युदासः सार्थकः। "अचः परस्मिन् पूर्वविधौ"[10] इति अतिदेशशास्त्रदृष्ट्या त्रिपादी असिद्धा। "स्थानिवदादेशोऽनल्विधौ" इति अतिदेशशास्त्रदृष्ट्या तु त्रिपादी सिद्धा इति अनेन अप्रत्ययग्रहणेन ज्ञाप्यते। "पूर्वत्रासिद्धे न स्थानिवत्" इति वचनं च "अचः परस्मिन् पूर्वविधौ" इति सूत्रस्य त्रिपाद्याम् अप्रवृत्तेः प्रपञ्चभूतमेव। एवञ्च "अप्रत्ययस्य विसर्जनीयस्य" इत्यस्य प्रत्ययभिन्नस्य विसर्जनीयस्य षत्वं, प्रत्ययभूतस्य विसर्जनीयस्य षत्वं न इत्यर्थः फलितः। तेन "अग्निः करोति" इत्यादौ विसर्गस्य प्रत्ययत्वात् षत्वं वार्यते इति दीक्षितः अभिप्रैति।

अप्रत्ययस्य विसर्जनीयस्य इत्यनयोः सामानाधिकरण्येनान्वये दोषः तद्वारणञ्च

सामानाधिकरण्येनान्वये दोषः

एवं यदि अप्रत्ययस्य विसर्जनीयस्य इत्यस्य प्रत्ययभिन्नस्य विसर्जनीयस्य षत्वम् इति व्याख्यास्यते, तर्हि मातुः कार्यम् इत्यत्र विसर्गस्य च षत्वं स्यात्। परन्तु तत्र षत्वं नेष्टम्। तत्र विसर्गस्य

प्रत्ययावयवत्वेऽपि, प्रत्ययत्वाभावात्, प्रत्ययभिन्नत्वात् षत्वं दुर्वारं स्यात् इति आक्षेप जायते।

सामानाधिकरण्येनान्वये दोषवारणम्

तस्य समाधानमुच्यते - कस्कादिगणे षत्वसिद्धये भ्रातुष्पुत्रः इति शब्दस्य पाठेन ङसिङसोः अतः स्थाने उकारात् परस्य विसर्गस्य षत्वं नेति ज्ञाप्यते। अर्थात् एकादेशशास्त्रनिमित्तकस्य विसर्गस्य षत्वं नेति ज्ञाप्यते। भ्रातुः पुत्रः इत्यत्रापि विसर्गस्य प्रत्ययभिन्नत्वेन इदुदुपधस्य चाप्रत्ययस्य इति सूत्रेणैव षत्वे सिद्धे, षत्वसिद्ध्यर्थं कस्कादिगणे भ्रातुष्पुत्रशब्दस्य पाठात् मातुः कार्यम् इत्यत्र विसर्गस्य प्रत्ययभिन्नत्वेऽपि षत्वं न भवतीति। अतः मातुः कार्यम् इत्यत्र विसर्गस्य षत्वं न भवति।

तत्र विसर्गस्य एकादेशशास्त्रनिमित्तकत्वं कथमिति निरूप्यते इदानीम् - मातृशब्दात् ङसिप्रत्यये कृते, अनुबन्धलोपे, मातृ अस् इति जाते "ऋत उत्"[11] इति सूत्रेण ऋकारस्य अकारस्य च स्थाने उकारादेशे, रपरत्वे, मातुर्स इति जाते, तत्र सस्य रात्सस्य इति सूत्रेण लोपे, रेफस्य विसर्गे च कृते मातुः इति रूपम्। यद्यपि अत्र विसर्गस्य एकादेशशास्त्रं साक्षात् निमित्तं न, अपि उर् इत्यादेशस्यैव एकादेशशास्त्रं निमित्तं, तथापि परम्परया एकादेशशास्त्रं विसर्गस्य प्रयोजकमेव। एवञ्च मातुः इत्यत्र विसर्गस्य परम्परया एकादेशशास्त्रनिमित्तकत्वात् षत्वे प्राप्ते, कस्कादिगणे भ्रातुष्पुत्रः इति शब्दपाठेन षत्वं वार्यते इति समाहितम्।

अप्रत्ययस्य विसर्जनीयस्य अनयोः वैयधिकरण्येनान्वयः

वैयधिकरण्येनान्वयावश्यकता

परन्तु अत्र शब्दरत्नकृत् अप्रत्ययस्य इत्यस्य विसर्जनीयस्य इत्यत्र वैयधिकरण्येनान्वयः, न तु सामानाधिकरण्येन अन्वयः इति। वैयधिकरण्येन अन्वये तु प्रत्ययावयवभिन्नः यः विसर्गः तस्य विसर्गस्य षत्वम् इत्यर्थः सिद्ध्यति। प्रत्ययावयवस्य विसर्गस्य तु न षत्वम्। दीक्षितोक्तवत् सामानाधिकरण्येन अन्वये तु अग्निः करोति इत्यत्र षत्वे वारितेऽपि, कविभिः कृतम् इत्यत्र अनिष्टं षत्वं दुर्वारं स्यात्। तत्र भिसः सकारस्य स्थाने प्रवृत्तस्य विसर्गस्य प्रत्ययावयवत्वेन प्रत्ययभिन्नत्वात् षत्वं स्यात्। तेन अनिष्टं स्यात्। अतः कविभिः कृतम् इत्यत्र षत्ववारणाय वैयधिकरण्यान्वयः वक्तव्यः एव। तेन प्रत्ययावयवस्य विसर्गस्य षत्वं न इत्यर्थलाभात्, तत्र विसर्गस्य प्रत्ययावयवत्वात् षत्वं न भवति इति इष्टं च सिद्ध्यति।

वैयधिकरण्येनान्वये प्रमाणानि

इत ऊर्ध्वं अप्रत्ययस्य इत्यस्य विसर्जनीयस्य इत्यत्र वैयधिकरण्यान्वये प्रमाणानि प्रदर्श्यन्ते।

प्रथमं प्रमाणम्

अप्रत्ययस्य इत्यस्य विसर्जनीयस्य इत्यनयोः सामानाधिकरण्येनान्वये, सुप्रत्ययस्य स्थाने आगतस्य विसर्गस्यैव स्थानिवद्भावेन प्रत्ययत्वात्, तस्यैव षत्ववारणम् अभिप्रेतं स्यात्। एवं सति असोः विसर्जनीयस्य इत्येव ब्रूयात्, अप्रत्ययग्रहणम् व्यर्थमेव स्यात्।

द्वितीयं प्रमाणम्

किञ्च सामानाधिकरण्येनान्वये "नित्यं समासेऽनुत्तरपदस्थस्य"[12] इति सूत्रे अनुत्तरपदस्थस्य इत्यस्य वैयर्थ्यं स्यात्। परमसर्पिः कुण्डिका इत्यत्र षत्ववारणार्थं हि तत्। यदि प्रत्ययभिन्नस्य विसर्गस्य षत्वम् इति सामानाधिकरण्येनान्वये सर्पिः इत्यत्र प्रत्ययभिन्नत्वात् अनेन सूत्रेण षत्वं दुर्वारं स्यात्। एवं सति अनुत्तरपदस्थस्य इत्यस्य ग्रहणं च व्यर्थं स्यात्।

तृतीयं प्रमाणम्

किञ्च "नित्यं समासे अनुत्तरपदस्थस्य" इति सूत्रभाष्यासङ्गतिः च भवति। तत्र हि भाष्ये "अथ अव्युत्पन्नं प्रातिपदिकं सर्पिरादि ततो नित्ये प्राप्ते इसुसोः सामर्थ्ये इति विभाषा आरभ्यते" इत्युक्तम्। एतद् असङ्गतं स्यात्। "सृपेरिस्" इत्यौणादिकसूत्रेण सृप्धातोः इस् प्रत्यये सर्पिः इति रूपं व्युत्पत्तिपक्षे बोध्यम्। अव्युत्पन्नं सर्पिस् इति प्रातिपदिकं च वर्तते इति सर्पिस् शब्दविषये व्युत्पत्तिपक्षः, अव्युत्पत्तिपक्षः उभयं वर्तते। यदा "सर्पिः" इति अव्युत्पन्नं प्रातिपदिकम् इति स्वीक्रियते तदा "इदुदुपधस्य चाप्रत्ययस्य" इत्यनेन नित्यतया षत्वे प्राप्ते, विकल्पेन षत्वसिद्धये "इसुसोः सामर्थ्ये" इति सूत्रमारब्धम् इति भाष्यार्थः। एतदर्थपरकं तद्भाष्यम् असङ्गतं स्यात् यदि सामानाधिकरण्येनान्वये स्वीकृते तु। कथम् इति चेत्, प्रत्ययभिन्नस्य षत्वविधानात् "इदुदुपधस्य चाप्रत्ययस्य" इति सूत्रेण, व्युत्पत्तिपक्षे, अव्युत्पत्तिपक्षे वा भवतु "सर्पिः" इत्यस्य अव्युत्पन्नप्रातिपदिकत्वे नित्यं षत्वं प्राप्नोति इति यद् कथितं तदसङ्गतं स्यात्। अर्थात् "अथ अव्युत्पन्नं प्रातिपदिकं सर्पिरादि" इति कथनमसङ्गतं स्यात्। वैयधिकरण्येनान्वये तु न तदसाङ्गत्यम्। तदा प्रत्ययावयवभिन्नस्य विसर्गस्य षत्वविधानात् अनेन सूत्रेण, सर्पिः इत्यत्र व्युत्पत्तिपक्षे विसर्गस्य प्रत्ययावयवत्वात्, प्रत्ययावयवभिन्नत्वाभावात् षत्वस्य प्राप्तिरेव न। अव्युत्पत्तिपक्षाङ्गीकारे तत्र विसर्गस्य प्रत्ययावयवभिन्नत्वात्, षत्वं नित्यं प्रवर्तते। एवं सति तत्र भाष्ये अव्युत्पन्नं प्रातिपदिकम् इति कथनमुचितं भवति। तस्मात् पूर्वोक्ताभिः युक्तिभिः एतद् निर्णीयते - अत्र प्रत्ययपदं प्रत्ययावयवपरम्। अतः प्रत्ययावयवभिन्नस्य विसर्गस्य षत्वम् इत्यर्थ एव उचितः। अत एव कविभिः कृतम् इत्यादौ विसर्गस्य प्रत्ययावयवत्वात् षत्वं न भवति। अग्निः करोति इत्यादौ तु व्यपदेशिवद्भावेन प्रत्ययावयवत्वं स्वीकृत्य षत्वं वारणीयम् इत्यभिप्रायः।

वैयधिकरण्येनान्वयपक्षे दोषः तद्वारणञ्च

एवं सिद्धान्तभूतेऽस्मिन् अर्थे च मातुः कार्यम् इत्यत्र षत्वं प्राप्नोति। तत्र मातृशब्दात् ङसिप्रत्यये कृते, अनुबन्धलोपे मातृ अस् इति स्थितिः। अत्र प्रत्ययत्वधर्मः अस् इत्यत्र वर्तते। न केवलमकारे, नापि केवले सकारे। स च प्रत्ययत्वधर्मः अस्समुदायवृत्तिधर्मः। तदुत्तरम् ऋकाराकारयोः एकादेशे उर् इत्यस्मिन् प्रत्ययत्वमतिदेष्टुं न शक्यते। यतः प्रत्ययत्वस्य अकारमात्रावृत्तित्वात्। एकादेशोत्तरं यः सकारः

प्रत्ययावयवः अवशिष्टः, तस्मिन् सकारे एकादेशोत्तरं प्रत्ययत्वधर्मस्य निहितत्वेऽपि, ततः परं रात्सस्य इति सूत्रेण तस्य च सकारस्य लोपे, उर् इत्येकादेशे प्रत्ययत्वसंपादनं दुर्लभमेव। यस्य अकारस्य स्थाने उर् आदेशः प्रवृत्तः स न प्रत्ययः। एवं सति उर् इत्यत्र रेफस्य स्थाने प्रवृत्तस्य विसर्गस्य प्रत्ययत्वाभावेन, प्रत्ययावयवभिन्नत्वात् षत्वं प्राप्तमेव सिद्धान्तपक्षेऽपि। एतदेवाभिप्रेत्य प्रकृतसूत्रे उरण रपरः सूत्रे भाष्ये च उक्तम् - "इह कस्मान्न भवति पितुः करोति, अप्रत्ययस्य इति षत्वं प्राप्नोति। अप्रत्ययविसर्जनीयस्य इत्युच्यते प्रत्ययविसर्जनी-यश्चायम्। लुप्यते अत्र प्रत्ययविसर्जनीयः रात्सस्य इति"। एवञ्च सिद्धान्तपक्षे च मातुः कार्यम् इत्यादौ प्रत्ययावयवभिन्नत्वेन षत्वं स्यादेव। तद्वारणं च भ्रातुष्पुत्रः शब्दस्य कस्कादिगणे पाठेन वार्यते इति बोध्यम्।

निष्कर्षः – "इदुदुपधस्य चाप्रत्ययस्य" इति हि सूत्रम्। इत् च उत् च इदुतौ, इदुतौ उपधे यस्य सः समुदायः इदुदुपधः समुदायः। इदुदुपधसमुदायस्य अवयवः यः विसर्गः तस्य विसर्गस्य। "इदुदुपधस्य" इत्यस्य वैयधिकरण्येन विसर्जनीयस्य इत्यत्रान्वयः। तेन "कविभिः कृतम्" इत्यत्र न षत्वम्। दीक्षितस्तु सामानाधिकरण्येन अन्वयं वक्ति। तन्न युक्तम्; कविभिः इत्यत्र षत्वं स्यात्। वैयधिकरण्येनान्वये प्रमाणानि प्रदर्शितानि च।

सन्दर्भग्रन्थसूची

१. शर्मणागिरिधरः शर्मणापरमेश्वरानन्दः, (२००४), वैयाकरण-सिद्धान्तकौमुदी प्रथमभागः,भट्टोजिदीक्षितविरचिता, बालमनोर-मातत्त्वबोधिनीव्याख्याद्वयोपेता, वाराणसी, मोतीलाल बनारसी दास।

२. दीक्षितः, (२००३), प्रौढमनोरमा शब्दरत्न-भैरवी-भावप्रकाशसर-लाव्याख्याभिः संवलिता, वाराणसी,चौखम्भा संस्कृत संस्थान।

३.श्रीपादसत्यानारायण, (२००१), लघुशब्देन्दुशेखरव्याख्याश्रीबाल-बोधिनीसंवलितः पञ्चसन्ध्यन्तःभागः, तिरुपतिः, राष्ट्रियसंस्कृत-विद्यापीठम्।

४. भट्टनागेशः, (२००१), लघुशब्देन्दुशेखरस्य चन्द्रिकाव्याख्यायुतः, प्रथमभागः, वाराणसी,चौखम्भा संस्कृत-संस्थानम्।

५. जयादित्यवामनः,(१९८५),काशिकावृत्तिःन्यासपदमञ्जरी-सहिता, वाराणसी, रत्ना पब्लिकेशन्स्।

६. व्याकरणमहाभाष्यम्, श्रीमन्महर्षिपतञ्जलिविनिर्मितम्।

पाद टिप्पणी

[1]वाक्यपदीयम् – 1.5

[2]वाक्यपदीयम् – 1.16

[3]महाभाष्यं पस्पशाह्निकम्

[4]इणः षः (८.३.३९) - इणः परस्य विसर्गस्य षकारः स्यात्पूर्वविषये। सर्पिष्पाशम्।

[5]कुप्वोः ≍क≍पौ च (८.३.३७) - कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः। चाद्विसर्गः।

[6]विसर्जनीयस्य सः (८.३.३४) - खरि विसर्जनीयस्य सः स्यात्।

[7]स्थानिवदादेशोऽनल्विधौ (१.१.५६) - आदेशः स्थानिवत्स्यात् न तु स्थान्यलाश्रयविधौ।

[8]खरवसानयोर्विसर्जनीयः (८.३.१५) - खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।

[9]अव्ययादाप्सुपः(२.४.८२)- अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्।

[10]अचः परस्मिन् पूर्वविधौ (१.१.५७) - परनिमित्तोऽजादेशः स्थानिवत् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये।

[11]ऋत उत् (६.१.१११) - ऋदन्तान्ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वम्॥

[12]नित्यं समासेऽनुत्तरपदस्थस्य (८.३.४५) – इसुसोर्विसर्गस्यानुत्तर-पदस्थस्य समासे